मार्कण्डेयपुराणम्/अध्यायः ०३१-०३५



एकत्रिंशोऽध्यायः

मदालसोवाच

सपिण्डीकरणादूर्ध्वं पितुर्यः प्रपितामहः ।
स तु लेपभुजो याति प्रलुप्तः पितृपिण्डतः ॥३१.१ ॥
तेषामन्यश्चतुर्थो यः पुत्रलेपभुजान्नभुक् ।
सोऽपि सम्बन्धतो हीनमुपभोगं प्रपद्यते ॥३१.२ ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
पिण्डसम्बन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः ॥३१.३ ॥
तेपसम्बन्धिनश्चान्ये पितामहपितामहात् ।
प्रभृत्युक्तास्त्रयस्तेषां यजमानश्च सप्तमः ॥३१.४ ॥
इत्येष मु नभिः प्रोक्तः सम्बन्धः साप्तपौरुषः ।
यजमानात् प्रभृत्यूर्ध्वमनुलेपभुजस्तथा ॥३१.५ ॥
ततोऽन्ये पूर्वजाः सर्वे ये चान्ये नरकौकसः ।
ये च तिर्यत्क्कमापन्ना ये च भूतादिसंस्थिताः ॥३१.६ ॥
तान् सर्वान् यजमानो वै श्राद्धं कुर्वन् यथाविधि ।
समाप्यायय‌ते वत्स ! येन येन शृणुष्व तत् ॥३१.७ ॥
अन्नप्रकिरणं यत् तु मनुष्यैः क्रियते भुवि ।
तेन तृत्पिमुपायान्ति ये पिशाचत्वमागताः ॥३१.८ ॥
यदम्बु स्त्रानवस्त्रोत्थं भूमौ पतति पुत्रक ! ।
तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते ॥३१.९ ॥

यास्तु गात्राम्बुकणिकाः पतन्ति धरणीतले ।
ताभिराप्यायनं तेषां ये देवत्वं कुले गताः ॥३१.१० ॥
उद्धृतेष्वथ पिण्डेषु याश्चान्नकणिका भुवि ।
ताभिराप्यायनं प्राप्ता ये तिर्यकत्वं कुले गताः ॥३१.११ ॥
ये वादग्धाः कुले बालाः क्रियायोग्या ह्यसंस्कृताः ।
विपन्नास्तेऽन्नविकिर-संमार्जनजलाशिनः ॥३१.१२ ॥
भुक्त्वा चाचामतां यच्च जलं यच्चाङ्घ्रिसेचने ।
ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयान्ति वै ॥३१.१३ ॥
एवं यो यजमानस्य यश्च तेषां द्विजन्मनाम् ।
कश्चिज्जलान्नविक्षेपः शुचिरुच्छिष्ट एव वा ॥३१.१४ ॥
तेनान्ये तत्कुले तत्र तत्तद्योन्यन्तरं गताः ।
प्रयान्त्याप्यायनं वत्स ! सम्यक् श्राद्धक्रियावताम् ॥३१.१५ ॥
अन्यायोपार्जितैरर्थैर्यच्छ्राद्धं क्रियते नरैः ।
तृप्यन्ते तेन चाण्डालपुक्कसाद्यासु योनिषु ॥३१.१६ ॥
एवमाप्यायनं वत्स ! बहूनामिह बान्धवैः ।
श्राद्धं कुर्वद्भिरन्नाम्बुबिन्दुक्षेपेण जायते ॥३१.१७ ॥
तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि ।
कुर्वीत कुर्वतः श्राद्धं कुले कश्चिन्न सीदति ॥३१.१८ ॥
तस्य कालानहं वक्षये नित्यनैमित्तिकात्मकान् ।
विधिना येन च नरैः क्रियते तन्निबोध मे ॥३१.१९ ॥
कार्यं श्राद्धममावास्यां मासि मास्युडुपक्षये ।
तथाष्टकास्वप्यवश्यमिच्छाकालं निबोध मे ॥३१.२० ॥
विशिष्टब्राह्मणप्राप्तौ सूर्येन्दुग्रहणेऽयने ।
विषुवे रविसंक्रान्तौ व्यतिपाते च पुत्रक ॥३१.२१ ॥
श्राद्धार्हद्रव्यसम्प्राप्तौ तथा दुःस्वप्नदर्शने ।
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्वीत चेच्छया ॥३१.२२ ॥
विशिष्टः श्रोत्रियो योगी वेदविज्ज्येष्ठसामगः ।
त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥३१.२३ ॥
दौहित्रऋत्विग्जामातृस्वस्त्रीयाः श्वशुरस्तथा ।

पञ्चाग्निकर्मनिष्ठश्च तपोनिष्ठोऽथ मातुलः ॥३१.२४ ॥
मातापितृपराश्चैव शिष्यसम्बन्धिबान्धवाः ।
एते द्विजोत्तमाः श्राद्धे समस्ताः केतनक्षमाः ॥३१.२५ ॥
अवकीर्णो तथा रोगी न्यूने चाङ्गे तथाधिके ।
पौनर्भवस्तथा काणः कुण्डो गोलोऽथ पुत्रक ॥३१.२६ ॥
मित्रध्रुक् कुनखी क्लीबः श्यावदन्तो निराकृतिः ।
अबिशस्तस्तु तातेन पिशुनः सोमविक्रयी ॥३१.२७ ॥
कन्यादूषयिता वैद्यो गुरुपित्रोस्तथोज्झकः ।
भृतकाध्यापकोऽमित्रः परपूर्वापतिस्तथा ॥३१.२८ ॥
वेदोज्झोऽथाग्निसन्त्यागी वृषलीपतिदूषितः ।
तथान्ये च विकर्मस्था वर्ज्याः पित्र्येषु वै द्विजाः ॥३१.२९ ॥
निमन्त्रयेत पूर्वेद्युः पूर्वोक्तान् द्विजसत्तमान् ।
दैवे नियोगे पित्र्ये च तांस्तथैवोपकल्पयेत् ॥३१.३० ॥
तैश्च संयतिभिर्भाव्यं यश्च श्राद्धं करिष्यति ।
श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽनुगच्छति ॥३१.३१ ॥
पितरस्तु तयोर्मासं तस्मिन रेतसि शेरते ।
गत्वा च योषितं श्राद्धे यो भुङ्क्ते यश्च गच्छति ॥३१.३२ ॥
रेतोमूत्रकृताहारास्तन्मासं पितरस्तयोः ।
तस्मात्तु प्रथमं कार्यं प्राज्ञेनोपनिमन्त्रणम् ॥३१.३३ ॥
अप्राप्तौ तद्दिने चापि वर्ज्या योषित्प्रसङ्गिनः ।
भिक्षार्थमागतान् वापि काले संयमिनो यतीन् ॥३१.३४ ॥
भोजयेत् प्रणिपाताद्यैः प्रासाद्य यतमानसः ।
यथैव शुक्लपक्षाद्वै पितॄणामसितः प्रियः ॥३१.३५ ॥
तथापराह्नः पूर्वाह्नात् पितॄणामतिरित्यते ।
संपूज्य स्वागतेनैतानभ्युपेतान् गृहे द्विजान् ॥३१.३६ ॥
पवित्रपाणिराचान्तानासनेषूपवेशयेत् ।
पितॄणामयुजः कामं युग्मान् दैवे द्विजोत्तमान् ॥३१.३७ ॥
एकैकं वा पितॄणाञ्च देवानाञ्च स्वशक्तितः ।
तथा मातामहानाञ्च तुल्यं वा वैश्वदेविकम् ॥३१.३८ ॥

पृथक् तयोस्तथा चान्ये केचिदिच्छन्ति मानवाः ।
प्राङ्मुखान्दैवसङ्कल्पान् पैत्र्यान् कुर्यादुदङ्मुखान् ॥३१.३९ ॥
तथैव मातामहानां विधिरुक्तो मनीषिभिः ।
विष्टरार्थे कुशान् दत्त्वा पूज्य चार्घ्यादिना बुधः ॥३१.४० ॥
पवित्रकादि वै दत्त्वा तेभ्योऽनुज्ञामवाप्य च ।
कुर्यादावाहनं प्राज्ञो देवानां मन्त्रतो द्विजः ॥३१.४१ ॥
यवाम्भोभिस्तथा चार्घ्यं दत्त्वा वै वैश्वदेविकम् ।
गन्धमाल्याम्बुधूपञ्च दत्त्वा सम्यक् सदिपकम् ॥३१.४२ ॥
अपसव्यं पितॄणाञ्च सर्वमेवोपकल्पयेत् ।
दर्भांश्च द्विगुणान् दत्त्वा तेभ्योऽनुज्ञामवाप्य च ॥३१.४३ ॥
मन्त्रपूर्वं पितॄणाञ्च कुर्यादावाहनं बुधः ।
अपसव्यं तथा चार्घ्यं यवार्थञ्च तथा तिलैः ॥३१.४४ ॥
निष्पादयेन्महाभाग ! पितॄणं प्रीणने रतः ।
अग्नौ कार्यमनुज्ञातः कुरुष्वेति ततो द्विजैः ॥३१.४५ ॥
जुहुयाद्व्यञ्जनक्षारवर्ज्यमन्नं यथाविधि ।
अग्नये कव्यवाहाय स्वहेति प्रथमाहुतिः ॥३१.४६ ॥
सोमाय वै पितृमते स्वाहेत्यन्या तथा भवेत् ।
यमाय प्रेतपतये स्वाहेति त्रितयाहुतिः ॥३१.४७ ॥
हुतावशिष्टं दद्याच्च भाजनेषु द्विजन्मनाम् ।
भाजनालम्भनं कृत्वा दद्याच्चान्नं यथाविधि ॥३१.४८ ॥
यथा सुखं जुषध्वं भो इति वाच्यमनिष्ठुरम् ।
भुञ्जीरंश्च ततस्तेऽपि तच्चित्ता मौनिनः सुखम् ॥३१.४९ ॥
यद्यदिष्टचतमं तेषां तत्तदन्नमसत्वरम् ।
अक्रुध्यंश्च नरो दद्यात् सम्भवेन प्रलोभयन् ॥३१.५० ॥
रक्षोघ्रांश्च जपेन्मन्त्रांस्तिलैश्च विकिरेन्महीम् ।
सिद्धार्थकैश्च रक्षार्थं श्राद्धं हि प्रचुरच्छलम् ॥३१.५१ ॥
पृष्टैस्तृप्तैश्च तृप्ताः स्थ तृप्ताः स्म इति वादिभिः ।
अनुज्ञातो नरस्त्वन्नं प्रकिरेत् भुवि सर्वतः ॥३१.५२ ॥
तद्वदाचमनार्थाय दद्यादापः सकृत् सकृत् ।

अनुज्ञाञ्च ततः प्राप्य यतवाक्कायमानसः ॥३१.५३ ॥
सतिलेन ततोऽन्नेन पिण्डान् सव्येन पुत्रक ! ।
पितनुद्दिश्य दर्भेषु दद्यादुच्छिष्टसन्निधौ ॥३१.५४ ॥
पितृतीर्थेन तोयञ्च दद्यात्तेभ्यः समाहितः ।
पितॄनिद्दिश्य यज्ञत्त्या यजमानो नृपात्मज ॥३१.५५ ॥
तद्वन्मातामहानाञ्च दत्त्वा पिण्डान् यथाविधि ।
गन्धमाल्यादिसंयुक्तं दद्यादाचमनं ततः ॥३१.५६ ॥
दत्त्वा च तक्षिणां शक्त्या सुस्वधास्त्विवति तान् वदेत् ।
तैश्च तुष्टैस्तथेत्युक्त्का वाचयेद्वैश्वदेविकान् ॥३१.५७ ॥
प्रीयन्तामिति भद्रं वो विश्वेदेवा इतीरयेन् ।
तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तदाशिषः ॥३१.५८ ॥
विसर्जयेत् प्रियाण्युक्त्का प्रणिपत्य च भक्तितः ।
आद्वारमनुगच्छेच्चागच्छेच्चानुप्रमोदितः ॥३१.५९ ॥
ततो नित्यक्रियां कुर्याद् भोजयेच्च तथातिथीन् ।
नित्यक्रियां पितॄणाञ्च केचिदिच्छन्ति सत्तमाः ॥३१.६० ॥
न पितॄणान्तथैवान्ये शेषं पूर्ववदाचरेत् ।
पृथक् पाकेन नेत्यन्ये केचित् पूर्वञ्च पूर्ववत् ॥३१.६१ ॥
ततस्तदन्नं भुञ्जीत सह भृत्यादिभिर्नरः ।
एवं कुर्वीत धर्मज्ञः श्राद्धं पित्र्यं समाहितः ॥३१.६२ ॥
यथा वा द्विजमुख्यानां परितोषोऽभिजायते ।
त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः ॥३१.६३ ॥
वर्ज्यानि चाहुर्विप्रेन्द्र ! कोपोऽध्वगमनं त्वरा ।
राजतञ्च तथा पात्रं शस्तं श्राद्धेषु पुत्रक ! ॥३१.६४ ॥
रजतस्य तथा कार्यं दर्शनं दानमेव वा ।
राजते हि स्वधा दुग्धा पितृभिः श्रूयते मही ।
तस्मात् पितॄणां रजतमभीष्टं प्रीतिवर्धनम् ॥३१.६५ ॥

इति श्रीमार्कण्डेयपुराणेऽलर्कानुशासने पार्वणश्राद्धकल्पोनाम एकत्रिंशोऽध्यायः

द्वात्रिंशोऽध्यायः

मदालसोवाच

अतः परं शृणुष्वेमं पुत्र ! भक्त्या यदाहृतम् ।
पितॄणां प्रीतये यद्वा वर्ज्यं वा प्रीतिकारकम् ॥३२.१ ॥
मासं पितॄणां तृप्तिश्च हविष्यान्नेन जायते ।
मासद्वयं मत्स्यमांसैस्तृप्तिं यान्ति पितामहाः ॥३२.२ ॥
त्रीन् मासान् हारिणां मांसं विज्ञेयं पितृतृप्तये ।
चतुर्मासांस्तु पुष्णाति शशस्य पिशितं पितॄन् ॥३२.३ ॥
शाकुनं पञ्च वै मासान् षण्मासान् शूकरामिषम् ।
छागलं सप्त वै मासानैणेयञ्चाष्टमासिकीम् ॥३२.४ ॥
करोति तृप्तिं नव वै रुरोर्मांसं न संशयः ।
गवयस्यामिषं तृप्तिं करोति दशमासिकीम् ॥३२.५ ॥
तथैकादशमासंस्तु औरभ्रं पितृतृप्तिदम् ।
संवत्सरं तथा गव्यं पयः पायसमेव वा ॥३२.६ ॥
वाध्रीणसामिषं लौहं कालशाकन्तथा मधु ।
दौहित्रामिषमन्यच्च यच्चान्यत् स्वकुलोद्भवैः ॥३२.७ ॥
अनन्तां वै प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा ।
पितॄणां नात्र सन्देहो गायाश्राद्धञ्च पुत्रक ॥३२.८ ॥
श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिकाः ।
नीवाराः पौष्कलाश्चैव धान्यानां पितृतृप्तये ॥३२.९ ॥
यवव्रीहिसगोधूमतिला मुद्गाः ससर्षपाः ।
प्रियङ्गवः कोविदारा निष्पावाश्चातिशोभनाः ॥३२.१० ॥
वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथाणवः ।
विप्राषिका मसूराश्च श्राद्धकर्मणि गर्हिताः ॥३२.११ ॥

लशुनं गृञ्जनञ्चैव पलाण्डं,पिण्डमूलकम् ।
करम्भं यानि चान्यानि हीनानि रसवर्णत: ॥३२.१२ ॥
गान्धारिकामलाबूनि लवणान्यूषराणि च ।
आरक्ता ये च निर्यासा: प्रत्यक्षलवणानि च ॥३२.१३ ॥
वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ।
यच्चोत्कोचादिना प्राप्तं पतिताद्यदुपार्जितम् ॥३२.१४ ॥
अन्यायकन्याशुल्कोत्थं द्रव्यञ्चात्र विगर्हितम् ।
दुर्गन्धि फेनिलञ्चाम्बु तथैवाल्पतरोदकम् ॥३२.१५ ॥
न लभेद्यत्र गौस्तृप्तिं नक्तं यच्चाप्युपाहृतम् ।
यन्न सर्वापचोत्सृष्टं यच्चाभोज्यं निपानजम् ॥३२.१६ ॥
तद्वर्ज्यं सलिलं तात ! सदैव पितृकर्मणि ।
मार्गमाविकमौष्ट्रञ्च सर्वमैकशफञ्च यत् ॥३२.१७ ॥
माहिषञ्चामरञ्चैव धेन्वा गोश्चाप्यनिर्दशम् ।
पित्रर्थं मे प्रयच्छस्वेत्युक्त्वा यच्चाप्युपाहृतम् ॥३२.१८ ॥
वर्जनीयं सदा सदिभस्तत्पय: श्राद्धकर्मणि ।
वर्ज्या जन्तुमती रूक्षा क्षिति: प्लुष्टा तथाग्निना ॥३२.१९ ॥
अनिष्टदुष्टशब्दोग्रदुर्गन्धा चात्र कर्मणि ।
कुलापमानका: श्राद्धे व्यायुज्य कुलहिंसका: ॥३२.२० ॥
नग्ना: पातकिनश्चैव हन्युर्दृष्ट्या पितृक्रियाम् ।
अपुमानपविद्धश्च कुक्कुटो ग्रामशूकर: ॥३२.२१ ॥
श्वा चैव हन्ति श्राद्धानि यातुधानाश्च दर्शनात् ।
तस्मात् सुसंवृतो दद्यात्तिलैश्चावकिरन्महीम् ॥३२.२२ ॥
एवं रक्षा भवेच्छ्राद्धे कृता तातोभयोरपि ।
शावसूतकसंस्पृष्टं दीर्घरोगिभिरेव च ॥३२.२३ ॥
पतितैर्मलिनैश्चैव न पुष्णाति पितामहान् ।
वर्जनीयं तथा श्राद्धे तथोदक्याश्च दर्शनम् ॥३२.२४ ॥
मुण्डशौण्डसमाभ्यासो यजमानेन यादरात् ।
केशकीटावपन्नञ्च तथाश्वभिरवेक्षितम् ॥३२.२५ ॥
पूति पर्युषितञ्चैव वार्ताक्यभिषवांस्तथा ।

वर्जनीयानि वै श्राद्धे यच्च वस्त्रानिलाहतम् ॥३२.२६ ॥
श्रद्धया परया दत्तं पितॄणां नामगोत्रतः ।
यदाहारास्तु ते जातास्तदाहारत्वमेति तत् ॥३२.२७ ॥
तस्मात् श्रद्धावता पात्रे यच्छस्तं पितृकर्मणि ।
यथावच्चैव दातव्यं पितॄणां तृप्तिमिच्छता ॥३२.२८ ॥
योगिनश्च सदा श्राद्धे भोजनीया विपश्चिता ।
योगाधारा हि पिररस्तस्मात् तान् पूजयेत् सदा ॥३२.२९ ॥
ब्राह्मणानां सहस्रेभ्यो योगी त्वग्राशनी यदि ।
यजमानञ्च भोक्तॄंश्च नौरिवाम्भसि तारयेत् ॥३२.३० ॥
पितृगाथास्तथवात्र गीयन्ते ब्रह्मवादिभिः ।
या गीताः पितृभिः पूर्वमैलस्यासीन्महीपतेः ॥३२.३१ ॥
कदा नः सन्ततावग्र्यः कस्यचिद् भविता सुतः ।
यो योगिभुक्तशोषान्नो भुवि पिण्डं प्रदास्यति ॥३२.३२ ॥
गयायामथवा पिण्डं खड्गमांसं महाहविः ।
कालशाकं तिलाढ्यं वा कृसरं मासतृप्तये ॥३२.३३ ॥
वैश्वदेवञ्च सौम्यञ्च खड्गमांसं परं हविः ।
विषाणवर्ज्यखड्गाप्त्या आसूर्यञ्चाश्नुवामहे ॥३२.३४ ॥
दद्यात् श्राद्धं त्रयोदश्यां मघासु च यथाविधि ।
मधुसर्पिः समायुक्तं पायसं दक्षिणायने ॥३२.३५ ॥
तस्मात् सम्पूजयेत् भक्त्या स्वपितॄन् पुत्र मानवः ।
कामानभीप्सन् सकलान् पापाच्चात्मविमोचनम् ॥३२.३६ ॥
वसून् रुद्रांस्तथादित्यान्नक्षत्रग्रहतारकाः ।
प्रीणयन्ति मनुष्याणां पितरः श्राद्धतर्पिताः ॥३२.३७ ॥
आयुः प्रज्ञां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः ॥३२.३८ ॥
एतत् ते पुत्र ! कथितं श्राद्धकर्म यथोदितम् ।
काम्यानां श्रूयतां वत्स ! श्राद्धानां तिथिकीर्तनम् ॥३२.३९ ॥

इति श्रीमार्कण्डेयपुराणे श्राद्धकल्पो नाम द्वात्रिंशोऽध्यायः

त्रयस्त्रिंशोऽध्यायः

मदालसोवाच

प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदा ।
वरार्थिनी तृतीया तु चतुर्थो शत्रुनाशिनी ॥३३.१ ॥
श्रियं प्राप्रोति पञ्चम्यां षष्ठ्यां पूज्यो भवेन्नरः ।
गणाधिपत्यं सप्तम्यामष्टम्यां वृद्धिमुत्तमाम् ॥३३.२ ॥
स्त्रियो नवम्यां प्राप्रोति दशम्यां पूर्णकामताम् ।
वेदांस्तथाप्नुयात् सर्वानेकादश्यां क्रियापरः ॥३३.३ ॥
द्वादश्यां जयलाभञ्च प्राप्रोति पितृपूजकः ।
प्रजां मेधां पशुं वृद्धिं स्वतन्त्र्यं पुष्टमुत्तमाम् ॥३३.४ ॥
दीर्घमायुरथैश्वर्यं कुर्वाणस्तु त्रयोदशीम् ।
अवाप्नोति न सन्देहः श्राद्धं श्रद्धापरो नरः ॥३३.५ ॥
यथासम्भावितान्नेन श्राद्धसम्पत्समन्वितः ।
युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ॥३३.६ ॥
तेन कार्यं चतुर्दश्यां तेषां प्रीतिमभीप्सता ।
श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचिः ॥३३.७ ॥
सर्वान् कामानवाप्रोति स्वर्गञ्चानन्तमश्नुते ।
कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः ॥३३.८ ॥
अपत्यकामो रोहिण्यां सौम्ये चौजस्वितां लभेत् ।
शौर्यमाद्रासु चाप्नोति क्षेत्रादि च पुनर्वसौ ॥३३.९ ॥
पुष्टिं पुष्ये सदाभ्यर्च्य आश्लेषासु वरान् सुतान् ।
मघासु स्वजनश्रैष्ठ्यं सौभाग्यं फाल्गुनीषु च ॥३३.१० ॥
प्रदानशीलो भवति सापत्यश्चोत्तरासु च ।
प्रयाति श्रेष्ठतां सत्यं हस्ते श्राद्धप्रदो नरः ॥३३.११ ॥

रूपयुक्तश्च चित्रासु तथापत्यान्यवाप्नुयात् ।
वाणिज्यलाभदा स्वातिर्विशाखा पुत्रकामदा ॥३३.१२ ॥
कुर्वन्तश्चानुराधासु लभन्ते चक्रवर्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यमुत्तमम् ॥३३.१३ ॥
आषाढासु यशः प्राप्तिरुत्तरासु विशोकता ।
श्रवणे च शुभान् लोकान् धनिष्ठासु धनं महत् ॥३३.१४ ॥
वेदवित्त्वमभिजिति भिषक्सिद्धन्तु वारुणे ।
अजाविकं प्रौष्ठपदे विन्देद् गास्तु तथोत्तरे ॥३३.१५ ॥
रेवतीषु तथा कुप्यमश्विनीषु तुरङ्गमान् ।
श्राद्धं कुर्वंस्तथाप्नोति भरणीष्वायुरुत्तमम् ।
तस्मात् काम्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्ववित् ॥३३.१६ ॥

इति श्रीमार्कण्डेयपुराणे काम्यश्राद्धफलकथनं नाम त्रयस्त्रिंशोऽध्यायः

चतुस्त्रिंशोऽध्यायः

मदालसोवाच

एवं पुत्र ! गृहस्थेन देवताः पितरस्तथा ।
संपूज्या हव्यकव्याभ्यामन्नेनातिथिबान्धवाः ॥३४.१ ॥
भूतानि भृत्याः सकलाः पशुपक्षिपिपीलिकाः ।
भिक्षवो याचमानाश्च ये चान्ये वसता गृहे ॥३४.२ ॥
सदाचारवता तात ! साधुना गृहमेधिना ।
पापं भुङ्क्ते समुल्लङ्घ्य नित्यनैमित्तिकीः क्रियाः ॥३४.३ ॥

अलर्क उवाच

कथितं मे त्वया मातर्नित्य नैमित्तिकञ्च यत् ।
नित्यनैमित्तिकञ्चैव त्रिविधं कर्म पौरुषम् ॥३४.४ ॥
सदाचारमहं श्रोतुमिच्छामि कुलनन्दिनि ।
यत् कुर्वन् सुखमाप्नोति परत्रेह च मानवः ॥३४.५ ॥

मदालसोवाच

गृहस्थेन सदा कार्यमाचारपरिपालनम् ।
न ह्याचारविहीनस्य सुखमत्र परत्र वा ॥३४.६ ॥
यज्ञदानतपांसीह पुरुषस्य च भूतये ।
भवन्ति यः सदाचारं समुल्लङ्घ्य प्रवर्तते ॥३४.७ ॥
दुराचारो हि पुरुषो नेहायुर्विन्दते महत् ।
कार्यो यत्नः सदाचारे आचारो हन्त्यलक्षणम् ॥३४.८ ॥
तस्य स्वरूपं वक्षयामि सदाचारस्य पुत्रक ।
तन्ममैकमनाः श्रुत्वा तथैव परिपालय ॥३४.९ ॥
त्रिवर्गसाधने यत्नः कर्तव्यो गृहमेधिना ।
तत्संसिद्धो गृहस्थस्य सिद्धिरत्र परत्र च ॥३४.१० ॥
पादेनार्थस्य पारत्र्यं कुर्यात् सञ्चयमात्मवान् ।
अर्धेन चात्मभरणन्नित्यनैमित्तिकान्वितम् ॥३४.११ ॥
पादञ्चात्मार्थमायस्य मूलभूतं विवर्धयेत् ।
एवमाचरतः पुत्र ! अर्थः साफल्यमर्हति ॥३४.१२ ॥
तद्वत् पापनिषेधार्थं धर्मः कार्यो विपश्चिता ।
परत्रार्थं तथैवान्यः काम्योऽत्रैव फलप्रदः ॥३४.१३ ॥
प्रत्यवायभयात् काम्यस्तथान्यश्चाविरोधवान् ।

द्विधा कामोऽपि गदितस्त्रिवर्गस्याविरोधतः ॥३४.१४ ॥
परम्परानुबन्धांश्च धर्मादींस्तान् शृणुष्व मे ॥३४.१५ ॥
धर्मो धर्मानुबन्धार्थो धर्मो नात्मार्थबाधकः ।

उभाभ्याञ्च द्विधा कामस्तेन तौ च द्विधा पुनः ॥३४.१६ ॥
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चापि चिन्तयेत् ।
समुत्थाय तथाचम्य प्राङ्मुखो नियतः शुचिः ॥३४.१७ ॥
पूर्वां सन्ध्यां सनक्षत्रां पश्चिमां सदिवाकराम् ।
उपासीत यथान्यायं नैनां जह्यादनापदि ॥३४.१८ ॥
असत्प्रलापमनृतं वाक्पारुष्यञ्च वर्जयेत् ।
असच्छास्त्रमसद्वादमसत्सेवाञ्च पुत्रक !॥३४.१९ ॥
सायं प्रापतस्तथा होमं कुर्वीत नियतात्मवान् ।
नोदयास्तमने बिम्बमुदीक्षेत विवस्वतः ॥३४.२० ॥
केशप्रसाधनादर्शदर्शनं दन्तधावनम् ।
पूर्वाह्ण एव कार्याणि देवतानाञ्च तर्पणम् ॥३४.२१ ॥
ग्रामावसथतीर्थानां क्षेत्राणाञ्चैव वर्त्मनि ।
विण्मूत्रं नानुतिष्ठेत न कृष्टे न च गोव्रजे ॥३४.२२ ॥
नग्नां परस्त्रियं नेक्षेन्न पश्येदात्मनः सकृत् ।
उदक्या दर्शनां स्पर्शो वर्ज्यं सम्भाषणन्तथा ॥३४.२३ ॥
नाप्सु मूत्रं पुरीषं वा मैथुनं वा समाचरेत् ।
नाधितिष्ठेच्छकृन्मूत्रकेशभस्मकपालिकाः ॥३४.२४ ॥
तुषाङ्गारास्थिशीर्णानि रज्जुवस्त्रादिकानि च ।
नाधितिष्ठेत्तथा प्राज्ञः पथि चैवन्तथा भुवि ॥३४.२५ ॥
पितृदेवमनुष्याणां भूतानाञ्च तथार्च्चनम् ।
कृत्वा विभवतः पश्चाद् गृहस्थो भोक्तुमर्हति ॥३४.२६ ॥
प्राङ्मुखोदङ्मुखो वापि स्वाचान्तो वाग्यतः शुचिः ।
भुञ्जीतान्नञ्च तच्चित्तो ह्यन्तर्जानुः सदा नरः ॥३४.२७ ॥
उपगातादृते दोषं नान्यस्योदीरयेद् बुधः ।
प्रत्यक्षलवणं वर्ज्यमन्नमत्युष्णमेव च ॥३४.२८ ॥
न गच्छन्न च तिष्ठन् वै विण्मूत्रोत्सर्गमात्मवान् ।
कुर्वीत नैव चाचामन् यत् किञ्चिदपि भक्षयेत् ॥३४.२९ ॥
उच्छिष्टो नालपेत् किञ्चित् स्वाध्यायञ्च विवर्जयेत् ।
गां ब्राह्मणं तथा चाग्निं स्वमूर्धानञ्च न स्पृशेत् ॥३४.३० ॥

न च पश्येद्रविं नेन्दुं न नक्षत्राणि कामतः ।
भिन्नासनं तथा शय्यां भाजनञ्च विवर्जयेत् ॥३४.३१ ॥
गुरूणामासनं देयमभ्युत्थानादिसत्कृतम् ।
अनुकूलं तथालापमभिवादनपूर्वकम् ॥३४.३२ ॥
तथानुगमनं कुर्यात् प्रतिकूलं न संजयेत् ।
नैकवस्त्रश्च भुञ्जीत न कुर्याद्देवतार्चनम् ॥३४.३३ ॥
न वाहयेद् द्विजान्नाग्नौ मेहं कुर्वीत् बुद्धिमान् ।
स्नायीत न नरो नग्नो न शयीत कदाचन ॥३४.३४ ॥
न पाणिभ्यामुभाभ्याञ्च कण्डूयेत शिरस्तथा ।
न चाभीक्ष्णं शिरः स्त्रानं कार्यं निष्कारणं नरैः ॥३४.३५ ॥
शिरः स्त्रातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत् ।
अनध्यायेषु सर्वेषु स्वाध्यायञ्च विवर्जयेत् ॥३४.३६ ॥
ब्राह्मणानिलगोसूर्यान् न मेहेत कदाचन ।
उदङ्मुखो दिवा रात्रावुत्सर्गं दक्षिणामुखः ॥३४.३७ ॥

आबाधाषु यथाकामं कुर्यान्मूत्रपुरीषयोः ।
दुष्कृतं न गुरोर्ब्रूयात् क्रुद्धं चैनं प्रसादयेत् ॥३४.३८ ॥
परिवादं न शृणुयादन्येषामपि कुर्वताम् ।
पन्था देयो ब्राह्मणानां राज्ञो दुः खातुरस्य च ॥३४.३९ ॥
विद्याधिकस्य गुर्विण्या भारार्तस्य यवीयसः ।
मूकान्धबधिराणाञ्च मत्तस्योन्मत्तकस्य च ॥३४.४० ॥
पुंश्चल्याः कृतवैरस्य बालस्य पतितस्य च ।
देवालकं चैत्यतरुं तथैव च चतुष्पथम् ॥३४.४१ ॥
विद्याधिकं गुरुं देवं बुधः कुर्यात् प्रदक्षिणम् ।
उपानद्वस्त्रमाल्यादि धृतमन्यैर्न धारयेत् ॥३४.४२ ॥
उपवीतमलङ्कारं करकञ्चैव वर्जयेत् ।
चतुर्दश्यान्तथाष्टम्यां पञ्चदश्याञ्च पर्वसु ॥३४.४३ ॥
तैलाभ्यङ्गं तथा भोगं योषितश्च विवर्जयेत् ।
न क्षिप्तपादजङ्घश्च प्राज्ञस्तिष्ठेत् कदाचन ॥३४.४४ ॥

न चापि विक्षिपेत् पादौ पादं पादेन नाक्रमेत् ।
मर्माभिघातमाक्रोशं पैशुन्यञ्च विवर्जयेत् ॥३४.४५ ॥
दम्भाभिमानतीक्ष्णानि न कुर्वीत विचक्षणः ।
मूर्खोन्मत्तव्यसनिनो विरूपान्मायिनस्तथा ॥३४.४६ ॥
न्यूनाङ्गांश्चाधिकाङ्गांश्च नोपहासैर्विदूषयेत् ।
परस्य दण्डं नोद्यच्छेच्छिक्षार्थं पुत्रशिष्ययोः ॥३४.४७ ॥
तद्वन्नोपविशेत् प्राज्ञः पादेनाक्रम्य चासनम् ।
संयावं कृषरं मांसं नात्मार्थमुपसाधयेत् ॥३४.४८ ॥
सायं प्रातश्च भोक्तव्यं कृत्वा चातिथिपूजनम् ।
प्राङ्मुखोदङ्मुको वापि वाग्यतो दन्तधावनम् ॥३४.४९ ॥
कुर्वीत सततं वत्स ! वर्जयेद्वर्ज्यवीरुधः ।
नोदक्शिराः स्वपेज्जातु न चप्रत्यक्शिरा नरः ॥३४.५० ॥
शिरस्यगस्त्यमास्थाय शयीताथ पुरन्दरम् ।
न तु गन्धवतीष्वप्सु स्नायीत न तथा निशि ॥३४.५१ ॥
उपरागे परं स्नानमृते दिनमुदाहृतम् ।
अपमृज्यान्न चास्नातो गात्राण्यम्बरपाणिभिः ॥३४.५२ ॥
न चापि धूनयेत् केशान् वाससी न च धूनयेत् ।
नानुलेपनमादद्यादस्नातः कर्हिचिद् बुधः ॥३४.५३ ॥
न चापि रक्तवासाः स्याच्चित्रासितधरोऽपि वा ।
न च कुर्याद्विपर्यासं वाससोर्नापि भूषणे ॥३४.५४ ॥
वर्ज्यञ्च विदशं वस्त्रमत्यन्तोपहतञ्च यत् ।
केशकीटावपन्नञ्च क्षुण्णं श्वभिरवेक्षितम् ॥३४.५५ ॥
अवलीढावपन्नञ्च सारोद्धरणदूषितम् ।
पृष्ठमांसं वृथामांसं वर्ज्यमांसञ्च पुत्रक !॥३४.५६ ॥
न भक्षयीत सततं प्रत्यक्षलवणानि च ।
वर्ज्यं चिरोषितं पुत्र ! भक्तं पर्युषितञ्च यत् ॥३४.५७ ॥
पिष्टशाकेक्षुपयसां विकारान्नृपनन्दन ! ।
तथा मांसविकारांश्च ते च वर्ज्याश्चिरोषिताः ॥३४.५८ ॥
उदयास्तमने भानोः शयनञ्च विवर्जयेत् ।

नास्नातो नैव संविष्टो न चैवान्यमना नरः ॥३४.५९ ॥
न चैव शयने नोर्व्यामुपविष्टो न शब्दवत् ।
न चैकवस्त्रो न वदन् प्रेक्षतामप्रदाय च ॥३४.६० ॥
भुञ्जीत पुरुषः स्नातः सायं प्रातर्यथाविधि ।
परदारा न गन्तव्याः पुरुषेण विपश्चिता ॥३४.६१ ॥
इष्टापूर्तायुषां हन्त्री परदारगतिर्नृणाम् ।
न हीदृशमनायुष्यं लोके किञ्चन विद्यते ॥३४.६२ ॥
यादृशं पुरुषस्येह परदाराभिमर्षणम् ।
देवार्चनाग्निकार्याणि तथा गुर्वभिवादनम् ॥३४.६३ ॥
कुर्वीत सम्यगाचम्य तद्वदन्नभुजिक्रियाम् ।
अफेनाभिरगन्धाभिरद्भिरच्छाभिरादरात् ॥३४.६४ ॥
आचामेत् पुत्र ! पुण्याभिः प्राङ्मुखोदङ्मुखोऽपि वा ।
अन्तर्जलादावसथाद्वल्मीकान्मूषिकस्थलात् ॥३४.६५ ॥
कृतशौचावशिष्टाश्च वर्जयेत् पञ्च वै मृदः ।
प्रक्षाल्य हस्तौ पादौ च समभ्युक्षय समाहितः ॥३४.६६ ॥
अन्तर्जानुस्तथाऽचामेत् त्रिश्चतुर्वा पिबेदपः ।
परिमृज्य द्विरास्यान्तं खानि मूर्धानमेव च ॥३४.६७ ॥
सम्यगाचम्य तोयेन क्रियां कुर्वीत वै शुचिः ।
देवतानामृषीणाञ्च पितॄणाञ्चैव यत्नतः ॥३४.६८ ॥
समाहितमना भूत्वा कुर्वीत सततं नरः ।
क्षुत्त्वा निष्ठीव्य वासश्च परिधायाचमेद् बुधः ॥३४.६९ ॥
क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु ।
कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् ॥३४.७० ॥
कुर्वीतालम्बनं चापि दक्षिणश्रवणस्य वै ।
यथाविभवतो ह्येतत् पूर्वाभावे ततः परम् ॥३४.७१ ॥
अविद्यमाने पूर्वोक्ते उत्तरप्राप्तिरिष्यते ।
न कुर्याद् दन्तसङ्घर्षं नात्मनो देहताडनम् ॥३४.७२ ॥
स्वप्नाध्ययनभोज्यानि सन्ध्ययोश्च विवर्जयेत् ।

सन्ध्यायां मैथुनञ्चापि तथा प्रस्थानमेव च ॥३४.७३ ॥
पूर्वाह्ने तात ! देवानां मनुष्याणाञ्च मध्यमे ।
भक्त्या तथापराह्ने च कुर्वीत पितृपूजनम् ॥३४.७४ ॥
शिरः स्नातश्च कुर्वीत दैवं पैत्र्यमथापि वा ।
प्राङ्मुखोदङ्मुखो वापि श्मश्रुकर्म च कारयेत् ॥३४.७५ ॥
व्यङ्गिनीं वर्जयेत् कन्यां कुलजामपि रोगिणीम् ।
विकृतां पिङ्गलाञ्चैव वाचाटां सर्वदूषिताम् ॥३४.७६ ॥
अव्यङ्गीं सौम्यनासाञ्च स्रवलक्षणलक्षिताम् ।
तादृशीमुद्वहेत् कन्यां श्रेयः कामो नरः सदा ॥३४.७७ ॥
उद्वहेत् पितृमात्रोश्च सप्तमीं पञ्चमीन्तथा ।
रक्षेद्दारान् त्यजेदीर्ष्यां दिवा च स्वप्नमैथुने ॥३४.७८ ॥
परोपतापकं कर्म जन्तुपीडाञ्च वर्जयेत् ।
उदक्या सर्ववर्णानां वर्ज्या रात्रिरचतुष्टयम् ॥३४.७९ ॥
स्त्रीजन्मपरिहारार्थं पञ्चमीमपि वर्जयेत् ।
ततः षष्ठ्यां व्रजेद्रात्र्यां श्रेष्ठा युगमासु पुत्रक ॥३४.८० ॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशेत सदा नरः ॥३४.८१ ॥
विधर्मिणोऽह्नि पूर्वाख्ये सन्ध्याकाले च षण्डकाः ।
क्षुरकर्मणि वान्ते च स्त्रीसम्भोगे च पुत्रक ॥३४.८२ ॥
स्नायीत चेलवान् प्राज्ञः कटभूमिमुपेत्य च ।
देववेदद्विजातीनां साधुसत्यमहात्मनाम् ॥३४.८३ ॥
गुरोः पतिव्रतानाञ्च तया यज्वितपस्विनाम् ।
परिवादं न कुर्वीत परिहासञ्च पुत्रक ॥३४.८४ ॥
कुर्वतामविनीतानां न श्रोतव्यं कथञ्चन ।
नोत्कृष्टशय्यासनयोर्नापकृष्टस्य चारुहेत् ॥३४.८५ ॥
न चामङ्गल्यवेशः स्यान्न चामङ्गल्यवाग्भवेत् ।
धवलाम्भरसंवीतः सितपुष्पविभूषितः ॥३४.८६ ॥
नोद्धतोन्मत्तमूढैश्च नाविनीतैश्च पण्डितः ।

गच्छेन्मैत्रीं न चाशीलैर्न च चौर्यादिदूषितैः ॥३४.८७ ॥
न चातिव्ययशीलैश्च न लुब्धैर्नापि वैरिभिः ।
न बन्धकीभिर्न न्यूनैर्बन्धकीपतिभिस्तथा ॥३४.८८ ॥
सार्धं न बलिभिः कुर्यान्न च न्यूनैर्न निन्दितैः ।
न सर्वशङ्किभिर्नित्यं न च दैवपरैर्नरैः ॥३४.८९ ॥
कुर्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः ।
प्राज्ञैरपिशुनैः शक्तैः कर्मण्युद्योगभागिभिः ॥३४.९० ॥
सुहृद्दीक्षितभूपालस्नातकश्वशुरैः सह ।
ऋत्विगादीन् षडर्घार्हानर्चयेच्च गृहागतान् ॥३४.९१ ॥
यथाविभवतः पुत्र ! द्विजान् संवत्सरोषितान् ।
अर्चयेन्मधुपर्केण यथाकालमतन्द्रितः ॥३४.९२ ॥
तिष्ठेच्च शासने तेषां श्रेयस्कामो द्विजोत्तमः ।
न च तान् विवदेद्धीमानाक्रुष्टश्चापि तैः सदा ॥३४.९३ ॥
सम्यग्गृहार्चनं कृत्वा यथास्थानमनुक्रमात् ।
संपूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमात् ॥३४.९४ ॥
प्रथमां ब्रह्मणे दद्यात् प्रजानांपतये ततः ।
तृतीयाञ्चैव गुह्येभ्यः कश्यपाय तथापराम् ॥३४.९५ ॥
ततोऽनुमतये दत्त्वा दद्याद् गृहबलिन्ततः ।
पूर्वाख्यातं मया यत्ते नित्यकर्मक्रियाविधौ ॥३४.९६ ॥
वैश्वदेवन्ततः कुर्याद्बलयस्तत्र मे शृणु ।
यथास्थानविभागन्तु देवानुद्दिश्य वै पृथके ॥३४.९७ ॥
पर्जन्याय धरित्रीणां दद्याच्च माणके त्रयम् ।
वायवे च प्रतिदिशं दिग्भ्यः प्राच्यादितः क्रमात् ॥३४.९८ ॥
ब्रह्मणे चान्तरीक्षाय सूर्याय च यथाक्रमम ।
विश्वेभ्यश्चैव देवेभ्यो विश्वबूतभ्य एव च ॥३४.९९ ॥
उषसे भूतपतये दद्याच्चोत्तरतस्ततः ।
स्वधा नम इतीत्युक्त्वा पितृभ्यश्चापि दक्षिणे ॥३४.१०० ॥
कृत्वापसव्यं वायव्यां यक्ष्मैतत्तेति भाजनात् ।
अन्नावशेषमिच्छन् वै तोयं दद्याद्यथाविधि ॥३४.१०१ ॥

ततोऽन्नाग्रं समुद्धृत्य हन्तकारोपकल्पनम् ।
यथाविधि यथान्यायं ब्राह्मणायोपपादयेत् ॥३४.१०२ ॥
कुर्यात् कर्माणि तीर्थेन स्वेन स्वेन यथाविधि ।
देवादीनान्तथा कुर्याद् ब्राह्मेणाचमनक्रियाम् ॥३४.१०३ ॥
अङ्गुष्ठोत्तरतो रेखा पाणेर्या दक्षिणस्य तु ।
एतद् ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥३४.१०४ ॥
तर्जन्यङ्गुष्ठयोरन्तः पैत्र्यं तीर्थमुदाहृतम् ।
पितॄणां तेन तोयादि दद्यान्नान्दीमुखादृते ॥३४.१०५ ॥
अङ्गुल्यग्रे तथा दैवं तेन दिव्यक्रियाविधिः ।
तीर्थं कनिष्ठिकामूले कायं तेन प्रजापतेः ॥३४.१०६ ॥
एवमेभिः सदा तीर्थैर्देवानां पितृभिः सह ।
सदा कार्याणि कुर्वीत नान्यतीर्थेन कर्हिचित् ॥३४.१०७ ॥
ब्राह्मेणाचमनं शस्तं पित्र्यं पैत्र्येण सर्वदा ।

देवतीर्थेन देवानां प्राजापत्यं निजेन च ॥३४.१०८ ॥
नान्दीमुखानां कुर्वीत प्राज्ञः पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजापतेः ॥३४.१०९ ॥
युगपज्जलमग्निञ्च बिभृयान्न विचक्षणः ।
गुरुदेवान् प्रति तथा न च पादौ प्रसारयेत् ॥३४.११० ॥
नाचक्षीत धयन्तीं गां जलं नाञ्जलिना पिबेत् ।
शौचकालेषु सर्वेषु गुरुष्वल्पेषु वा पुनः ॥३४.१११ ॥
न विलम्बेत शौचार्थं न मुखेनानलं धमेत् ।
तत्र पुत्र ! न वस्तव्यं यत्र नास्ति चतुष्टयम् ॥३४.११२ ॥
ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ।
जितामित्रो नृपो यत्र बलवान् धर्मतत्परः ॥३४.११३ ॥
तत्र नित्यं वसेत् प्राज्ञः कुतः कुनृपतौ सुखम् ।
यत्राप्रधृष्यो नृपतिर्यत्र शस्यवती मही ॥३४.११४ ॥
पौराः सुसंयता यत्र सततं न्यायवर्तिनः ।
यत्रामत्सरिणो लोकास्तत्र वासः सुखोदयः ॥३४.११५ ॥

यस्मिन् कृषीबला राष्ट्रे प्रायशो नातिभोगिनः ।
यत्रौषधन्यशेषाणि वसेत्तत्र विचक्षणः ॥३४.११६ ॥
तत्र पुत्र न ! वस्तव्यं यत्रैतत् त्रितयं सदा ।
जिगीषुः पूर्ववैरश्च जनश्च सततोत्सवः ॥३४.११७ ॥
वसेन्नित्यं सुशीलेषु सहवासिषु पण्डितः ।
इत्येतत् कथितं पुत्र ! मया ते हितकाम्यया ॥३४.११८ ॥

इति श्रीमार्कण्डेयपुराणे अलर्कानुशासने सदाचारकथनं नाम चतुस्त्रिंशोऽध्यायः

पञ्चत्रिंशोऽध्यायः

मदालसोवाच

अतः परं शृणुष्व त्वं वर्ज्यावर्ज्यप्रतिक्रियाम् ।
भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंभृतम् ॥३५.१ ॥
अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः ।

शशकः कच्छपो गोधा श्वावित् खड्गोऽथ पुत्रक ॥३५.२ ॥
भक्षया ह्येते तथा वर्ज्यौ ग्रामशूकरकुक्कुटौ ।
पितृदेवादिशेषश्च श्राद्धे ब्राह्मणकाम्यया ॥३५.३ ॥
प्रोक्षितञ्चौषधार्थञ्च खादन्मांसं न दुष्यति ।
शङ्खाश्मस्वर्णरूप्याणां रज्जूनामथ वाससाम् ॥३५.४ ॥
शाकमूलफलानाञ्च तथा विदलचर्मणाम् ।
मणिवज्रप्रवालानान्तथा मुक्ताफलस्य च ॥३५.५ ॥
गात्राणाञ्च मनुष्याणामम्बुना शौचमिष्यते ।
यथायसानां तोयेन ग्राव्णः सङ्घर्षणेन च ॥३५.६ ॥

सस्त्रेहानाञ्च भाण्डानां शुद्धिरुष्णेन वारिणा ।
शूर्पधान्याजिनानाञ्च मुषलोलूखलस्य च ॥३५.७॥
संहतानाञ्च वस्त्राणां प्रोक्षणात् सञ्चयस्य च ।
वल्कलानामशेषाणामम्बुमृच्छौचमिष्यते ॥३५.८॥
तृणकाष्ठौषधीनाञ्च प्रोक्षणात् शुद्धिरिष्यते ।
आविकानां समस्तानां केशानाञ्चापि मेध्यता ॥३५.९॥
सिद्धार्थकानां कल्केन तिलकल्केन वा पुनः ।
साम्बुना तात ! भवति उपघातवतां सदा ॥३५.१०॥
तथा कार्पासिकानाञ्च विशुद्धिर्जलभस्मना ।
दारुदन्तास्थिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते ॥३५.११॥
पुनः पाकेन भाण्डानां पार्थिवानाञ्च मेध्यता ।
शुचिर्भैक्षं कारुहस्तः पण्यं योषिन्मुखं तथा ॥३५.१२॥
रथ्यागतमविज्ञातं दासवर्गादिनाहृतम् ।
वाक्प्रशस्तं चिरातीतमनेकान्तरितं लघु ॥३५.१३॥
अतिप्रभूतं बालञ्च वृद्धातुरविचेष्टितम् ।
कर्मान्ताङ्गाराशालाश्च स्तनन्धयसुताः स्त्रियः ॥३५.१४॥
शुचिन्यश्च तथैवापः स्त्रन्त्योऽगन्धबुद्बुदाः ।
भूमिर्विशुध्यते कालाद्दाहमार्जनगोक्रमैः ॥३५.१५॥
लेपादुल्लेखनात् सेकाद्वेश्मसंमार्जनार्चनात् ।
केशकीटावपन्ने च गोघ्राते मक्षिकान्विते ॥३५.१६॥
मृदम्बुभस्मना तात ! प्रोक्षितव्यं विशुद्धये ।
औदुम्बराणामम्लेन क्षारेण त्रपुसीसयोः ॥३५.१७॥
भस्माम्बुभिश्च कांस्यानां शुद्धिः प्लावाद् द्रवस्य च ।
अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च ॥३५.१८॥
अन्येषाञ्चैव तद्द्रव्यैर्वर्णगन्धापहारतः ।
शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् ॥३५.१९॥
तथा मांसञ्च चण्डालक्राव्यादादिनिपातितम् ।
रथ्यागतञ्च चेलादि तात ! वातात् शुचि स्मृतम् ॥३५.२०॥
रजोऽग्निरश्वो गौश्छाया रश्मयः पवनो मही ।

विप्रुषो मक्षिकाद्याश्च दुष्टसङ्गाददोषिणः ॥३५.२१॥
अजाश्वौ मुखतो मेध्यौ न गोर्वत्सस्य चाननम् ।
मातुः प्रस्त्रवणं मेध्यं शकुनिः फलपातने ॥३५.२२॥
आसनं शयनं यानं नावः पथि तृणानि च ।
सोमसूर्यांशुपवनैः शुध्यन्ते तानि पण्यवत् ॥३५.२३॥
रथ्यावसर्पण-स्त्रान-क्षुत्पान-स्नानकर्मसु ।
आचामेत यथान्यायं वासो विपरिधाय च ॥३५.२४॥
स्पृष्टानामप्यसंसर्गैर्विरथ्याकर्दमाम्भसाम् ।
पक्केष्टरचितानाञ्च मेध्यता वायुसङ्गमात् ॥३५.२५॥
प्रभूतोपहतादन्नादग्रमुद्धृत्य सन्त्यजेत् ।
शेषस्य प्रोक्षणं कुर्यादाचम्यादिभस्तथा मृदा ॥३५.२६॥
उपवासस्त्रिरात्रन्तु दुष्टभक्ताशिनो भवेत् ।
अज्ञाते ज्ञानपूर्वन्तु तद्दोषोपशमेन तु ॥३५.२७॥
उदक्याश्वशृगालादीन् सूतिकान्त्यावसायिनः ।
स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥३५.२८॥
नारं स्पृष्ट्वास्थि सस्त्रेहं स्त्रातः शुध्यति मानवः ।
आचम्यैव तु निःस्त्रेहं गामालभ्यार्कमीक्षय वा ॥३५.२९॥
न लङ्घयेत् तथैवासृक्ष्ठीवनोद्वर्तनानि च ।
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत् कदाचन ॥३५.३०॥
न चालपेज्जनद्विष्टां वीरहीनान्तथा स्त्रियम् ।
गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः ॥३५.३१॥
पञ्च पिण्डाननुधृत्य न स्त्रायात् परवारिणि ।
स्त्रायीत देवखातेषु गङ्गा-ह्रदप्रसरित्सु च ॥३५.३२॥
देवता-पितृ-सच्छास्त्र-यज्ञ-मन्त्रादिनिन्दकैः ।
कृत्वा तु स्पर्शनालापं शुध्येतार्कावलोकनात् ॥३५.३३॥
अवलोक्य तथोदक्यामन्त्यजं पतितं शवम् ।
विधर्मि-सूतिका-षण्ड-विवस्त्रान्त्यावसायिनः ॥३५.३४॥
सूतनिर्यातकांश्चैव परदाररताश्च ये ।
एतदेव हि कर्तव्यं प्राज्ञैः शोधनमात्मनः ॥३५.३५॥

अभोज्यं सूतिका-षण्ड-मार्जाराखुश्वकुक्कुटान् ।
पतिताविद्धचण्डाल-मृतहारांश्च धर्मवित् ॥३५.३६ ॥
संस्पृश्य शुध्यते स्त्रानादुदक्या ग्रामशूकरौ ।
तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि ॥३५.३७ ॥
यस्य चानुदिनं हानिर्गृहे नित्यस्य कर्मणः ।
यश्च ब्राह्मणसन्त्यक्तः किल्विषी स नराधमः ॥३५.३८ ॥
नित्यस्य कर्मणो हानिं न कुर्वीत कदाचन ।
तस्य त्वकरणे बन्धः केवलं मृतजन्मसु ॥३५.३९ ॥
दशाहं ब्राह्मणस्तिष्ठेद्दानहोमादिवर्जितः ।
क्षत्रियो द्वादशाहञ्च वैश्यो मासार्धमेव च ॥३५.४० ॥
शूद्रस्तु मासमासीत निजकर्मविवर्जितः ।
ततः परं निजं कर्म कुर्युः सर्वे यथोदितम् ॥३५.४१ ॥
प्रोताय सलिलं देयं बहिर्दग्ध्वा तु गोत्रकैः ।
प्रथमेऽह्नि चतुर्थे च सप्तमे नवमे तथा ॥३५.४२ ॥
भस्मास्थिचयनं कार्यं चतुर्थे गोत्रकैर्दिने ।
उर्ध्वं संचयनात् तेषामङ्गस्पर्शो विधीयते ॥३५.४३ ॥
सोदकैस्तु क्रियाः सर्वाः कार्याः संचयनात्परम् ।
स्पर्श एव सपिण्डानां मृताहनि तथोभयोः ॥३५.४४ ॥
अन्वेकमृक्षमाशस्त्र-तोयोद्बन्धन-वह्निषु ।
विषप्रपातादिमृते प्रायोनाशकयोरपि ॥३५.४५ ॥
बाले देशान्तरस्थे च तथा प्रव्रजिते मृते ।
सद्यः शौचमथान्यैश्च त्र्यहमुक्तमशौचकम् ॥३५.४६ ॥
सपिण्डानां सपिण्डस्तु मृतेऽन्यस्मिन्मृतो यदि ।
पूर्वाशौचसमाख्यातैः कार्यास्त्वत्र दिनैः क्रियाः ॥३५.४७ ॥
एष एव विधिर्दृष्टो जन्मन्यपि हि सूतके ।
सपिण्डानां सपिण्डेषु यथावत्सोदकेषु च ॥३५.४८ ॥
जाते पुत्रे पितुः स्त्रानं सचेलन्तु विधीयते ।
तत्रापि यदि चान्यस्मिन् जाते जायेत चापरः ॥३५.४९ ॥
तत्रापि शुद्धिरुद्दिष्टा पूर्वजन्मवतो दिनैः ।

दशद्वादशमासार्ध-माससंख्यैर्दिनैर्गतैः ॥३५.५०॥
स्वाः स्वाः कर्मक्रियाः कुर्युः सर्वे वर्णा यथाविधि ।
प्रेतमुद्दिश्य कर्तव्यमेकोद्दिष्टं ततः परम् ॥३५.५१॥
दाननि चैव देयानि ब्राह्मणेभ्यो मनीषिभिः ।
यद्यदिष्टतमं लोके यच्चापि ययितं गृहे ॥३५.५२॥
तत्तद् गुणवते देयं तदेवाक्षयमिच्छता ।
पूर्णैस्तु दिवसैः स्पृष्ट्वा सलिलं वाहनायुधम् ॥३५.५३॥
प्रतोददण्डौ च तथा सम्यग्वर्णाः कृतक्रियाः ।
स्ववर्णधर्मनिर्दिष्टमुपादानं तथा क्रियाः ॥३५.५४॥
कुर्युः समस्ताः शुचिनः परत्रेह च भूतिदाः ।
अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता ॥३५.५५॥
धर्मतो धनमाहार्यं यष्टव्यञ्चापि यत्नतः ।
यच्चापि कुर्वतो नात्मा जुगुप्सामेति पुत्रक !॥३५.५६॥
तत्कर्तव्यमशङ्केन यन्न गोप्यं महाजने ।
एवमाचरतो वत्स ! पुरुषस्य गृहे सतः ।
धर्मार्थकामसंप्राप्त्या परत्रेह च शोभनम् ॥३५.५७॥

इति श्रीमार्कण्डेयपुराणेऽलर्कानुशासने वर्ज्यावर्ज्यनामा पञ्चत्रिंशोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- अनुनाद सिंह

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium